International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 139-140
© 2019 IJSR
www.anantaajournal.com
Received: 21-07-2019
Accepted: 23-08-2019

**Dr. MVB Gangadhara Rao**
HOD, Department of Sanskrit,
K.G.R.L. Degree College,
Bhimavaram, W.G.Dt.,
Andhra Pradesh, India

**Corresponding Author:**
**Dr. MVB Gangadhara Rao**
HOD, Department of Sanskrit,
K.G.R.L. Degree College,
Bhimavaram, W.G.Dt.,
Andhra Pradesh, India

# महाकवि काळिदास विरचित रघुवंशमहाकाव्ये अयोध्यानगर वर्णनम्

**Dr. MVB Gangadhara Rao**

**कविपरिचयः**

श्लो॥ महालक्ष्मी निवासं तं महावाणी विलासकम्।
महाकाळी प्रसादं श्री काळिदासमुपास्महे ॥

संस्कृतसाहित्ये महाकविः काळिदासः समुन्नतस्थानमलञ्चचकार। अतएव सः "कविकुलगुरुरिति', 'कविकुलतिलकः' इति पण्डितैः प्रशंस्यते। '*Kalidasa is our National Poet", "Indian Shakespeare* 'इति प्रशंसा दृश्यते। तथैव –

श्लो ॥ पुराकवीनां गणना प्रसङ्गे कनिष्टिकाधिष्टित काळिदासः ।
अद्याऽपि तत्तुल्य कवेरभावात् अनामिका सार्थवती बभूव ॥

उपमालङ्कारवर्णनविषये काळिदास सदृशो अन्यो न विद्यते। अतएव "उपमा काळिदासस्य" इति महाकविरयं संकीर्तितः।

श्लो ॥ सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिं वरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥

इति श्लोके अयं महाकविः उपमालङ्कार सहृदयरञ्जकेन अत्यन्तरमणीयतया वर्णितवान्। स्वयंवरमण्डपे प्रविश्य हस्तवरमालयुक्तां इन्दुमतीं दीपशिखासदृशेन वर्णितवान्। अतः 'दीपशिखा काळिदासः' इति बिरुदाञ्चितोऽभूत्।

**काळिदास काल, स्थल निर्णयः**

काळिदासमहाकवेः कालनिर्णयं निर्दिष्टं कर्तुं न शक्यते। अस्मिन् विषये भिन्नाभिप्रायाः गोचरन्ति। क्री.पू. अष्टमशताब्दीयः (८) इति कचित् वदन्ति। अपरे केचित् क्री.परं. प्रथम (१) शताब्दिरिति तथैव एकादश (११) शताब्दिरिति अभिप्रायाः गोचरन्ति। काळिदासमहाकवेः जन्मस्थलविषयेऽपि भिन्नाभिप्रायाः सन्ति। काश्मीरदेशीयः इति उज्जयिनी इति अन्ये वदन्ति । कालदेशविवादः त्यक्त्वा भारतदेशे समुत्पन्नो अयं महाकविः इति वक्तुं शक्यते। तेन विरचितानि महाकाव्यानि नाटकानि च यशःकारकाः भवन्ति।

**काळिदासविरचित ग्रन्थाः**

१. रघुवंशम्, २. कुमारसम्भवम्, ३. माळविकाग्निमित्रम्, ४. विक्रमोर्वशीयम्, ५. मेघसन्देशम् (मेघदूतम्), ६. ऋतुसंहारम्, ७. अभिज्ञानशाकुन्तलम् चेति।

**अष्टादशवर्णनानि**

श्लो ॥ नगरार्णव शैलर्तु चन्द्रार्कोदय वर्णनैः,
उद्यान सलिल क्रीडा मधुपान रतोत्सवैः ।
विप्रलम्भैर्विवाहैश्च कुमारोदय वणनैः,
मन्त्रद्यूत प्रयाणाजि नायकाभ्युदयैरपि॥

पूर्वोक्त वर्णनेषु आद्यतमं नगरवर्णनं रघुवंशमनुसृत्य विषय परिशीलने - रघुवंशे नगरवर्णनम्

Total no. of Sargas in Raghuvamsa: 19
Nagara Varnana in Sargas: 7
Total no. of Cities: 5
Their Names are

१) अयोध्या नगरम् (साकेतपुरम्)
२) पाटलीपुत्रम् (पुष्पपुरम)
३) महिष्मती नगरम्
४) मधुरा नगरम्
५) श्रुङ्गिभेरपुरम्

एतेषु पञ्चनगरेषु अयोध्यानगरमधिकृत्य विशिष्ट वर्णनं दृश्यते । तदनन्तरं मधुरानगर पाटलीपुत्र प्रभृति नगरवर्णनम्, इन्दुमती स्वयंवर सन्दर्भे षष्ठसर्गे प्रस्तावन मात्रेण वर्णितमस्ति। अयोध्या नगर वर्णनम्

रघुवंशेचतुर्दश सर्गे (१४) दशम (१०) श्लोके श्रीरामपट्टाभिषेकसमये अयोध्या नगर वर्णनमस्ति।

श्लो ॥ समौलरक्षो हरिभिः स सैन्यः, तूर्यस्वनानन्दित पौरवर्गः।
विवेश सौदोद्गत लाज वर्षा मुत्तोरणा मन्वय राजधानीम् ॥ - रघुवंशे - १४-१०.

श्रीरामः अयोध्यानगरं परिपालयन् स्वपरिपालने सुसन्तोष सम्पन्नमयोध्यानगरं द्रष्टुं सपरिवारः सह समुन्नतं राजभवनं अधिरोहयत् ।

श्लो ॥ ऋद्धापणं राजपथं स पश्यन्
विगाह्यमानां सरयूं च नौभिः ।
विलासिभिश्चाध्युषितानि पौरैः
पुरोपकण्डोप वनानि रेमे ॥ - रघुवंशे - १४-३०

क्रय विक्रयार्थं आगतवन्तः प्रजासमूहैः अयोध्यानगरं भाति । वस्तु धन समृद्धापणैः अयोध्या नगरी अलङ्कृता भाति । सरयूनदीतीरः स नौका सालङ्कृता व्यापारार्थं आगतवद्भिः पुरजनैः सोभायमानः भवति । एतादृशं नगरं दृष्ट्वा श्रीरामः आनन्दपरवशोभूत् इति अयोध्या नगरी अवर्णयत् ।

अश्वमेध याग सन्दर्भे श्रीरामेण आह्वानिताः राजानः सर्वदिग्भ्यः आगतवन्तः तस्मिन् समये अयोध्या नगरीमेव अवर्णयत् ।

श्लो ॥ उपशल्यनिविष्टैस्तैश्चतुरमुखी बभौ ।
अयोध्या सृष्ट लोकैकसद्मः पैतामहीतनुः ॥ - रघुवंशे -१५-६०

चतुर्वेदाः चतुर्दारा इव अलङ्कृता अयोध्या नगरी वेदपठनैः सृष्टिकर्तारं प्रजापतिरिव भाति इति । षोडशसर्गे (१६) ३८ श्लोके कुश परिपालन समये शिल्पिनः स्व परिकरैः अयोध्या नगरं सुसम्पन्नमकरोत् । ते स्व परिश्रमेण तां नगरीं सहज सोभावतं कृत्वा नूतनपट्टणमिव अलं चकार।

श्लो ॥ तां शिल्पि सञ्चाः प्रभुणानियुक्ता
स्तथागतां सम्भृत साधनत्वात्।
रं नवीचक्रुरपां विसर्गात्
मेघानिदाघग्लपिता मिवोर्वीम् ॥ रघुवंशे - १६-३८

एवं पूर्ववैभवं सम्प्रप्य अयोध्यानगरी एवं भाति -

श्लो ॥ सामन्दुरासंश्रयिभिस्तुङ्गैः
शालाविधिस्तम्भगातैश्च नागैः ।
पूराबभासे विपणिस्थपण्या
सर्वाङ्गनदाभरणेव नारी ॥ रघुवंशे - १६-४१

सालङ्कृता सर्वाभरण समन्विता इव अयोध्यानगरी धन, धान्य कोशैः अश्वशालाः अश्वैः, गजशालाः गजसमूहैः तथा विविध वस्तुसम्पद्भिः भाति ।

एवं पूर्ववैभवं पुनः प्राप्य अयोध्यानगरी भाति । तादृशीं नगरी परिपालयन् राजा कुशः इन्द्रादपि, कुबेरादपि औन्नत्यमवाप। स्वार्गात् अलकानगरादपि अयोध्यासौन्दर्य विशिष्टो भाति। इति अवगम्यते ।

**उपसंहारः**

एवंविधानेन रघुवंशे अयोध्या नगरवर्णनं अद्भुतमेवास्ति । रघुवंश,कुमारसम्भव महाकाव्ययोः नगरार्णववर्णनं च, नवरस अलङ्कारयुक्त महाकाव्यलक्षणानि अपि च अष्टादशवर्णनानि परिपूर्णतया गोचरन्ति । अत एव 'महाकाव्यौ" इति नामसार्थकं भवति।

**उपयक्तग्रन्थसूची:**


1. रघुवंशम् - महाकवि कालिदासः, वि.वि. रङ्गय्यश्रेष्ठि, चेन्नपुरी, १९११
2. साहित्यदर्पणम्,विश्वनाथः, चौखाम्भा विद्याभवन्, वारणासी, १९५७